# श्री बिल्वाष्टकम्

Shri Bilvashtakam

Source: Internet Archive — Shiva Stotra Ratnakar, Gita Press (CC0 scan; Bilvashtakam on printed pages 189–190). Also compared: Creative Commons CC0 1.0 — scan release; Sanskrit Wikisource — Bilvashtakam from the 1933 Brihat Stotra Ratnakara, revision 320186 (a different recension, compared).

## आठ बिल्वपत्र-श्लोक

SHLOKA 1

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम्।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्॥

Tridalaṃ Triguṇākāraṃ Trinetraṃ Ca Trayāyudham |
Trijanmapāpasaṃhāraṃ Bilvapatraṃ Śivārpaṇam ||

SHLOKA 2

त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः।
शिवपूजां करिष्यामि बिल्वपत्रं शिवार्पणम्॥

Triśākhairbilvapatraiśca Hyacchidraiḥ Komalaiḥ Śubhaiḥ |
Śivapūjāṃ Kariṣyāmi Bilvapatraṃ Śivārpaṇam ||

SHLOKA 3

अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे।
शुद्ध्यन्ति सर्वपापेभ्यो बिल्वपत्रं शिवार्पणम्॥

Akhaṇḍabilvapatreṇa Pūjite Nandikeśvare |
Śuddhyanti Sarvapāpebhyo Bilvapatraṃ Śivārpaṇam ||

SHLOKA 4

शालग्रामशिलामेकां विप्राणां जातु अर्पयेत्।
सोमयज्ञमहापुण्यं बिल्वपत्रं शिवार्पणम्॥

Śālagrāmaśilāmekāṃ Viprāṇāṃ Jātu Arpayet |
Somayajñamahāpuṇyaṃ Bilvapatraṃ Śivārpaṇam ||

SHLOKA 5

दन्तिकोटिसहस्राणि वाजपेयशतानि च।
कोटिकन्यामहादानं बिल्वपत्रं शिवार्पणम्॥

Dantikoṭisahasrāṇi Vājapeyaśatāni Ca |
Koṭikanyāmahādānaṃ Bilvapatraṃ Śivārpaṇam ||

SHLOKA 6

लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम्।
बिल्ववृक्षं प्रयच्छामि बिल्वपत्रं शिवार्पणम्॥

Lakṣmyāḥ Stanata Utpannaṃ Mahādevasya Ca Priyam |
Bilvavṛkṣaṃ Prayacchāmi Bilvapatraṃ Śivārpaṇam ||

SHLOKA 7

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्।
अघोरपापसंहारं बिल्वपत्रं शिवार्पणम्॥

Darśanaṃ Bilvavṛkṣasya Sparśanaṃ Pāpanāśanam |
Aghorapāpasaṃhāraṃ Bilvapatraṃ Śivārpaṇam ||

SHLOKA 8

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे।
अग्रतः शिवरूपाय बिल्वपत्रं शिवार्पणम्॥

Mūlato Brahmarūpāya Madhyato Viṣṇurūpiṇe |
Agrataḥ Śivarūpāya Bilvapatraṃ Śivārpaṇam ||

## फलश्रुति और समापन

SHLOKA 9

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात्॥

Bilvāṣṭakamidaṃ Puṇyaṃ Yaḥ Paṭhecchivasannidhau |
Sarvapāpavinirmuktaḥ Śivalokamavāpnuyāt ||

COLOPHON

इति बिल्वाष्टकं सम्पूर्णम्॥

Iti Bilvāṣṭakaṃ Sampūrṇam ||